# भाषाविज्ञानस्याङ्गानि (Parts of Linguistics)

भाषाविज्ञानं केवलं साहित्यसम्पत्तिसमृद्धाया एव भाषाया अध्ययनं नहि करोति अपितु साहित्यिकसम्पत्तिविरहिताया अपि भाषायाः वैज्ञानिकमध्ययनं करोति। भाषाविज्ञानस्य सम्बन्धः कस्याश्चन भाषायाः केनचन कालविशेषेणैव साकं नहि भवति अपितु तस्य सर्वेषां कालानां भाषाविषयकाणां तत्त्वैः साकं भवति भाषाविज्ञानं भाषायाः कस्याश्चन तत्वानि सङ्कलव्य तानि चाश्रित्य सिद्धान्तानामपि निर्धारणं करोति । अस्मिन्नध्ययने ध्वनीनामुच्चारणस्य, अक्षराणां, शब्दानां पदानां वाक्यानां च संरचनाया विवेचनं क्रियते । भाषाविज्ञानस्याङ्गानि संक्षेपेणात्र उपस्थाप्यन्ते

(1) ध्वनिविज्ञानम् - मानवभाषायाः अध्ययनस्य प्रमुखो विषयः ध्वनिः विद्यते । सम्पूर्णा भाषा ध्वन्याश्रिता भवति । अत एव भाषाविज्ञानेऽपि ध्वनेरध्ययनस्य महत्वपूर्णस्थानं भवति । ध्वनिविज्ञाने मानवशरीरस्योच्चारणोपयोगिनाम् अवयवानां परिचयः क्रियते । तानि चाङ्गानि निम्नाङ्कितानि सन्ति

1. स्वरयन्त्रम्, 2. मुखम्, 3. जिह्वा, 4. ताल्वादिकं च । तदनन्तरं ध्वनीनामुच्चारणस्थानस्य उच्चारणप्रयत्नस्य दृष्ट्यापि वर्गीकरणं क्रियते । तदनन्तरमिदमपि विचार्यते यत् तेषु ध्वनिषु कदा-कदा केन-केन च प्रकारेण विकासः सञ्जात इति । तानेव ध्वनिविकासानाश्रित्य केचन निश्चिताः ध्वनिनियमा अपि क्रियन्ते । अत एव ध्वनिविज्ञानस्य इमे विषयाः सन्ति उच्चारणावयवाः, ध्वनीनां संख्या, ध्वनीनां वर्गीकरणम्, ध्वनिविकाराणां दिशः, तासां कारणानि ध्वनिनियमाश्च ।

(2) पदविज्ञानम्-पदपदार्थनिरूपयता महर्षिणा पाणिनि नाऽभिहितम्–'सुप्तिङन्तं पदम्' । तथाविधाः वर्णाः पदशब्देना भिधीयन्ते येषां वर्णसमूहानामन्ते सुविभक्तीनामथवा तिवि भक्तीनां संयोगो भवति । आचार्यविश्वनाथेनाप्यभिहितम् 'वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः' इति । अस्मिन् पदविज्ञाने नानाविधानां पदानामध्ययनं क्रियते। यथा-संज्ञा सर्वनाम-क्रियाक्रियाविशेषणादिकानाम्, धातुरूपाणाम्, शब्द रूपाणाम् । अनेनैव साकमस्मिन् विज्ञाने पदानां मूलम्, पदानां व्युत्पत्तिः पदानां वाक्येषु प्रयोगाः, पदानां काले-काले सञ्जातं रूपपरिवर्तनम्, पदानां प्रयोगेषु देशकालानुसारेण विकारादिकाः विवेच्यन्ते । पदानि एव भाषायाः मूलभूतानि सन्ति । अत एव पदविज्ञानं भाषाविज्ञानस्य मूलभूतं विद्यते ।

(3) वाक्यविज्ञानम् - अनेकेषां सार्थकानाम् अन्वितानाञ्च पदानां समूहो वाक्यमित्यभिधीयते । वाक्यस्य स्वरूपं निरूपयता आचार्येण विश्वनाथेनाभिहितम्- 'वाक्यं स्याद् योग्यताकाङ्क्षा सत्तियुक्तः पदोच्चयः' इति । अयमाशयो यत् पदानां समूह एव वाक्यमित्यभिधीयते; परन्तु तस्मिन् पदसमूहे वैशिष्ट्य त्रयमपेक्षितं भवति वाक्यत्वाय - 1. योग्यता, 2. आकाङ्क्षा, 3. आसत्तिश्च । योग्यानां पदानां समूहो वाक्यमित्य भिधीयते । यथा अग्नेः योग्यता

दाहक्रियायामेवाऽस्ति, न तु सिञ्चनक्रियायाम् । अत एव अग्निना सिञ्चतीति वाक्यं न भवितुमर्हति, अपितु जलेन सिञ्चतीत्येव वाक्यम् ।

अनेनैव प्रकारेण साकाङ्क्षाणामेव पदानां समूहो वाक्य मित्यभिधीयते, न तु निराकाङ्क्षाणाम् । यथा 'रामो गच्छतीत्येव वाक्यम्, न तु रामः श्यामः मोहनाः' इति पदानां समूहो वाक्यं भवितुमर्हति एतेषां पदानां आकाङ्क्षारहितत्वात् ।

अनेनैव प्रकारेण पदेषु वाक्यत्वायासत्तिरप्यावश्यकम् । सा चासत्तिरपि द्विप्रकारवती भवति- कालकृता स्थानकृता च । कालकृताऽऽ सत्तेरभावादेव अद्याभिहितस्य रामः इति पदस्य दिनान्तरेऽभिहितेन 'गच्छति' इति पदेन साकं वाक्यता नहि जायते । इत्थमेव 'रामो गिरिर्भुङ्क्ते अग्निमान्' इति पदानां समूहेऽपि वाक्यत्वं नास्ति स्थानकृताऽऽसत्तेरभावात् । अतः 'रामो भुङ्क्ते गिरिरग्निमान्' इत्यनेन प्रकारेण पदानां क्रमेण भाव्यम् । अस्मिन् पदविज्ञाने वाक्यरचनाविषयको विचारः प्रस्तूयते, वाक्यानां भेदाश्चाधीयन्ते । अत्र वाक्यानाम् ऐतिहासिकं तुलनात्मकमध्ययनमपि प्रस्तूयते ।

(4) अर्थविज्ञानम् - शब्दार्थयोः शब्दविदः अभेदसम्बन्धं स्वीकुर्वन्ति । सर्वे शब्दाः सार्थकाः भवन्ति मानवाः तान् तान् अर्थानिवोद्दिश्य तान् बोधयितुं तेषां तेषां शब्दानां प्रयोग कुर्वन्ति । निरर्थकानां शब्दानामुच्चारयिता विक्षिप्त अथवा मूर्ख इत्यभिधीयते । गौः शब्दस्य प्रयोगः गोत्वावच्छिन्नायाः व्यक्तेः बोधनायैव क्रियते । इत्थं ज्ञायते यत् यदि शब्दाः शरीरभूता स्सन्ति तदा अर्थाः तेषामात्माभूताः । येन प्रकारेणात्मानं विना शरीरं नश्यति, तेनैव प्रकारेण शब्दानामपि सार्थकता अर्थरेव भवति । अत एवार्थविज्ञानं भाषाविज्ञानस्यातीव महत्वपूर्णमङ्गं वर्त्तते । अर्थविज्ञाने शब्दानामर्थनिर्धारणस्य प्रक्रिया अधीयते । कालक्रमेण कस्य शब्दस्य अर्थे केन प्रकारेण परिवर्तनं सञ्जातमित्यपि विचार्यते अर्थविज्ञाने यथा अभियुक्तशब्दस्य प्रयोगः प्राचीने काले प्रामाणिकपुरुषरूपस्यार्थस्य बोधनाय क्रियते स्म किन्तु वर्तमाने काले तस्य शब्दस्य प्रयोगः सागसपुरुषस्य बोधनाय क्रियते ।

इत्थं शब्दानाम् अर्थपरिवर्तनानि तेषामर्थपरिवर्तनानां कारणानि प्रभृतयो विषयाः अर्थविज्ञानस्य विषयाः सन्ति ।

-- By Sanjoy Barman